# શ્રી દક્ષિણામૂર્તિ સ્તોત્રમ

અપાસકાનાં યદુપાસનીયમુપાત્તવાસં વટશાખિમૂલે ।
તદ્ધામ દાક્ષિણ્યજુષા સ્વમૂર્ત્યા જાગર્તુ ચિત્તે મમ બોધરૂપમ ।। ૧ ।।
અદ્રાક્ષમક્ષીણદયાનિધાનમાચાર્યમાદ્યં વટમૂલભાગે ।
મૌનેન મન્દસ્મિતભૂષિતેન મહર્ષિલોકસ્ય તમો નુદન્તમ ।। ૨ ।।
વિદ્રાવિતાશેષતમોગણેન મુદ્રાવિશેષેણ મુહુર્મુનીનામ ।
નિરસ્ય માયાં દયયા વિધત્તે દેવો મહાંસ્તત્ત્વમસીતિ બોધમ ।। ૩ ।।
અપારકારુણ્યસુધાતરઙ્ગૈરપાઙ્ગપાતૈરવલોકયન્તમ ।
કઠોરસંસારનિદાઘતપ્તાન્મુનીનહં નૌમિ ગુરું ગુરૂણામ ।। ૪ ।।
મમાદ્યદેવો વટમૂલવાસી કૃપાવિશેષાત્કૃતસન્નિધાનઃ ।
ઓંકારરૂપામુપદિશ્ય વિદ્યામાવિદ્યકધ્વાન્તમપાકરોતુ ।। ૫ ।।
કલાભિરિન્દોરિવ કલ્પિતાઙ્ગં મુક્તાકલાપૈરિવ બદ્ધમૂર્તિમ ।
આલોકયે દેશિકમપ્રમેયમનાદ્યવિદ્યાતિમિરપ્રભાતમ ।। ૬ ।।
સ્વદક્ષજાનુસ્થિતવામપાદં પાદોદરાલંકૃતયોગપટ્ટમ ।
અપસ્મૃતેરાહિતપાદમઙ્ગે પ્રણૌમિ દેવં પ્રણિધાનવન્તમ ।। ૭ ।।
તત્ત્વાર્થમન્તેવસતામૃષીણાં યુવાઽપિ યઃ સન્નુપદેષ્ટુમીષ્ટે ।
પ્રણૌમિ તં પ્રાક્તનપુણ્યજાલૈરાચાર્યમાશ્ચર્યગુણાધિવાસામ ।। ૮ ।।
એકેન મુદ્રાં પરશું કરેણ કરેણ ચાન્યેન મૃગં દધાનઃ ।
સ્વજાનુવિન્યસ્તકરઃ પુરસ્તાદાચાર્યચૂડામણિરાવિરસ્તુ ।। ૯ ।।
આલેપવન્તં મદનાઙ્ગભૂત્યા શાર્દૂલકૃત્ત્યા પરિધાનવન્તમ ।
આલોકયે કચન દેશિકેન્દ્રમજ્ઞાનવારાકરબાડવાગ્નિમ ।। ૧૦ ।।
ચારુસ્મિત સોમકલાવતંસં વીણાધરં વ્યક્તજટાકલાપમ ।
ઉપાસતે કેચન યોગિનસ્ત્વામુપાત્તનાદાનુભવપ્રમોદમ ।। ૧૧ ।।
ઉપાસતે યં મુનયઃ શુકાદ્યા નિરાશિષો નિર્મમતાધિવાસાઃ ।
તં દક્ષિણામૂર્તિતનું મહેશમુપાસ્મહે મોહમહાર્તિશાન્ત્યૈ ।। ૧૨ ।।

કાન્ત્યા નિન્દિતકુન્દકન્દલવપુર્ન્યગ્રોધમૂલે વસ -
ન્કારુણ્યામૃતવારિભિર્મુનિજનં સંભાવયન્વીક્ષિતૈઃ ।
મોહધ્વાન્તવિભેદનં વિરચયન્બોધેન તત્તાદૃશા
દેવસ્તત્ત્વમસીતિ બોધયતુ માં મુદ્રાવતા પાણિના ॥ ૧૩ ॥
અગૌરગાત્રૈરલલાટનેત્રૈરશાન્તવેષૈરભુજઙ્ગભૂષૈઃ ।
અબોધમુદ્રૈરનપાસ્તનિદ્રૈર્પૂર્ણકામૈરમરૈરલં નઃ ॥ ૧૪ ॥
દૈવતાનિ કતિ સન્તિ ચાવનૌ નૈવ તાનિ મનસો મતાનિ મે ।
દીક્ષિતં જડધિયામનુગ્રહે દક્ષિણાભિમુખમેવ દૈવતમ ॥ ૧૫ ॥
મુદિતાય મુગ્ધશશિનાવતંસિને ભસિતાવલેપરમણીયમૂર્તયે ।
જગદીન્દ્રજાલરચનાપટિયસે મહસે નમોઽસ્તુ વટમૂલવાસિને ॥ ૧૬ ॥
વ્યાલમ્બિનીભિઃ પરિતો જટાભિઃ કલાવશેષેણ કલાધરેણ ।
પશ્યલ્લલાટેન મુખેન્દુના ચ પ્રકાશસે ચેતસિ નિર્મલાનામ ॥ ૧૭ ॥
ઉપાસકાનાં ત્વમુમાસહાયઃ પૂર્ણેન્દુભાવં પ્રકટીકરોષિ ।
ઉઅદદ્ય તે દર્શનમાત્રતો મે દ્રવત્યહો માનસચન્દ્રકાન્તઃ ॥ ૧૮ ॥
યસ્તે પ્રસન્નામનુસન્દધાનો મૂર્તિં મુદા મુગ્ધશશાઙ્કમૌલેઃ ।
ઐશ્વર્યમાયુર્લભતે ચ વિદ્યામન્તે ચ વેદાન્તમહારહસ્યમ ॥ ૧૯ ॥
॥ દક્ષિણામૂર્તિસ્તોત્રં સંપૂર્ણમ ॥